# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

# सत्रान्तपरीक्षा – दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा** – शास्त्री -३ (SEM-5) | **प्रश्नपत्रम् -७** (CE 3.5.9) | **गुणाः** – ७० |
| **विषयः-** सर्वदर्शनम् | | **ग्रन्थः-** मीमांसापरिभाषा |
| **दिनाङ्कः** – ११/१२/२०१८ | | **समयः** – १० तः १ |

## विभागः १

**प्रश्नः १ निम्नलिखितेषु द्वयोः व्याख्यां विवृणुत।** १०

१ मीमांसापरिभाषायाः मङ्गलश्लोकं विवृणुत।

२ वेदबोधितधर्माधर्मस्वरूपं प्रतिपादयत।

३ ब्राह्मणवाक्यभेदान् व्याख्यात।

**प्रश्नः २ निम्नलिखितयोः एकस्य निबन्धात्मकमुत्तरं लिखत।** १०

१ यागहोमशब्दार्थं विचार्य उपयोक्ष्यमाणसंस्कारभेदान् व्याख्यात।

२ यजिपदाऽश्रवणेऽपि यागविधिः तद्वाराऽपूर्वोत्पत्तिप्रकारश्च यथाग्रन्थं प्रतिपाद्यताम्।

## विभागः २

**प्रश्नः ३ निम्नलिखितेषु द्वयोः व्याख्यां विवृणुत।** १०

१ विधेस्त्रैविध्यं लक्षणोदाहरणैः प्रतिपादयत।

२ अङ्गसहितदर्शपूर्णमासयागस्वरूपं व्याख्यात।

३ यदाग्नेयमित्यत्र यजिपदाऽश्रवणात् यागविधानं न भवतीति पूर्वपक्षम् उपस्थाप्य खण्डयत।

**प्रश्नः ४ निम्नलिखितयोः एकस्य व्याख्यां विशदतया दत्त।** १०

१ श्रुत्यादिषट्प्रमाणानि सोदाहरणैः विवृणुत।

२ लिङ्गादिप्रत्ययाद्यभावेऽपि विधिं कल्पयित्वा त्रिकापूर्वाद्युत्पत्तिप्रक्रियां प्रतिपादयत।

## विभागः ३

**प्रश्नः ५ निम्नलिखितेषु द्वयोः व्याख्यां विवृणुत ।** **१०**

१ अर्थवादं यथाग्रन्थं स्पष्टयत ।

२ वेदप्रामाण्यं विचारयत ।

३ कर्मभेदं निरूपयत ।

**प्रश्नः ६ निम्नलिखितयोः द्वयोः एकस्य व्याख्यां विशदतया ददतु ।** **१०**

१ आर्थीभावना-शाब्दीभावनयोः स्वरूपं वैशिष्ट्यञ्च प्रतिपादयत ।

२ तत्प्रख्यादिहेतून्विचार्य त्रिकविचारं विचारयत ।

**प्रश्नः ७ निम्नलिखितप्रश्नेषु दशप्रश्नानाम् अतिलघूत्तराणि लिखन्तु ।** **१०**

१ वेदः कतिविधः ? के च ते ?

२ कर्मोत्पत्तिवाक्यं किम् ?

३ फलाकाङ्क्षाभ्यां कः विधिः ?

४ कः अधर्मः ?

५ मीमांसापरिभाषा केन रचिता ?

६ ग्रन्थकर्तुः मातापितरौ कौ ?

७ अपूर्वविधिः कः ?

८ किं नाम वाक्यम् ?

९ गुणकर्मणि प्राधान्यं कस्य ?

१० मीमांसादर्शनस्य प्रवर्तकः कः ?

११ अर्थवादः कतिविधः ? के च ते ?

१२ परिसंख्याविधिः कः कथ्यते ?

१३ अनेन होमेन स्वर्गं कुर्यादित्यत्र आकाङ्क्षा का ?

१४ गुणवाक्यं किम् ?

१५ किं नाम लिङ्गम् ?

------xxxxxx-----